संस्कृत-वार्ता:

06.08.2024

सायम् - 06:20

मुख्यवार्ता:

1 जयशङ्करः बांग्लादेशप्रकरणे लोकसभायाम् उक्तवान् यत् भारतं स्वनागरिकैः सह निकटतया निरन्तरं च सम्पर्के अस्ति।

2 ब्रिटेनसर्वकारः बाङ्ग्लादेशे अशान्तेः विषये संयुक्तराष्ट्रसंघस्य नेतृत्वे अन्वेषणं कर्तुम् आह्वयति, प्रधानमन्त्री शेख् हसीना च त्यागपत्रं दत्वा देशात् प्रस्थितवती।

3 लोकसभया अस्य वर्षस्य वित्त-विधेयकम् विचारार्थं, अनुमोदनाय च स्वीकृतम्।

4 बुल्गारियादेशे वर्तमानकाले संवैधानिकव्यवस्थायाः अनुगुणं सर्वकारस्य निर्माणाय तृतीयः अन्तिमः च प्रयासः अपि असफलः अभवत्। ततः परं नूतनं निर्वाचनम् भविष्यति।

5 पेरिस् ओलिम्पिक्स् इति क्रीडायां नीरज् चोपड़ा: पुरुषाणां कुन्तलप्रक्षेपण स्पर्धायाः अन्तिमचक्राय योग्यतां प्राप्नोत्। भारतीय-मल्लयोद्ध्री विनेश् फ़ोगाट् च उपान्त्य-स्पर्धां प्रति अगच्छत्।

## बांग्लादेश-जयशंकर

बांग्लादेशे अशान्तेः मध्ये प्रायः एकोनविंशतिसहस्राणि भारतीय-नागरिकाः सन्ति, तेषु नवसहस्राणि छात्राः सन्ति। अद्य अपराह्ले बाङ्ग्लादेशस्य स्थितिं प्रति राज्यसभायां वक्तव्यं ददन् विदेशमन्त्री डा.जयशङ्करः अवदत् यत् ढाका-नगरस्य उच्च-आयोगस्य परामर्शेण गतमासे एव बहुसङ्ख्यकाः छात्राः भारतं प्रत्यागताः इति। डा. जयशङ्करः उच्चसदनम् सूचितवान् यत् नवदेहलीप्रशासनम् अल्पसङ्ख्यकानां स्थितिं प्रति निरीक्षणं कुर्वत् अस्ति। तेषां संरक्षणार्थं कल्याणार्थं च प्रशासनम् विविधसमूहैः संस्थाभिः च सह सम्पर्के अस्ति। सः अवदत् यत् यावत्पर्यन्तं

विधि-व्यवस्थायाः प्रत्यक्षतया पुनःस्थापनं न भवति तावत् भारतदेशः गभीरतया चिन्तितः भविष्यति इति। सः अवदत् यत् भारतीय-सीमा-रक्षक-बलान्यपि अस्याः जटिल-स्थित्याः इतोऽपि असाधारणतमं भवितुं शक्नोतीति निर्देशो दत्तः अस्ति। सः अवदत् यत् बाङ्ग्लादेशस्य प्रधानमन्त्री शेख् हसीना सुरक्षासंस्थानानां नेतृभिः सह मिलित्वा स्वपदात् त्यागपत्रं दातुं निश्चितवती इति। सः सूचितवान् यत् सा तत्क्षणमेव भारतं आगन्तुं अनुमतिं याचितवती तथा च गतरात्रौ देहलीनगरं प्राप्तवती। गत चतुर्विंशतिहोराभ्यः, नवदेहली अपि ढाका-नगरस्य अधिकारिभिः सह नियमिततया सम्पर्के आसीत्। विदेश-मन्त्री अवदत् यत् बाङ्ग्लादेशस्य स्थितिः अद्यापि वर्धमाना एव अस्तीति। बाङ्ग्लादेश्-देशस्य जनरल् वाकर्-उज़्-ज़मान् नामकः सेनाप्रमुखः ह्यः राष्ट्रम् संबोधयन् दायित्वस्य ग्रहणपूर्वकं, अन्तरीमसर्वकारस्य निर्माणविषये च अवदत्। बांग्लादेशे भारतस्य कूटनीतिक-उपस्थितिविषये मन्त्री सूचितवान् यत् ढाका-नगरे उच्चायोगमतिरिच्य चिट्टगांग्, राजशाही, खुल्ना, सिल्हेट् इत्येतेषु नगरेषु सहायक-उच्च-आयोगाः सन्ति इति। सः अवदत् यत् आतिथेय-सर्वकारः एतेषां प्रतिष्ठानानां कृते अपेक्षितसुरक्षां प्रददाति इति भारतं अपेक्षते, तथा च स्थितिः सुस्थिरतां प्राप्य तेषां सामान्यकार्यस्य प्रतीक्षां करोति। एतन्मध्ये ब्रिटेनसर्वकारः बाङ्ग्लादेशे अशान्तेः विषये संयुक्तराष्ट्रसंघस्य नेतृत्वे अन्वेषणं कर्तुम् आह्वयति।

## बाङ्ग्लादेशस्य अन्तरिमसर्वकारः

बाङ्ग्लादेशे, भेदभाव-विरोधमाश्रित्य घटितेन छात्रान्दोलनेन अन्तरीम-सर्वकारनिर्माणस्य योजना निरूपिता अस्ति। अस्य आन्दोलनस्य समन्वयकः नोबेल्-पुरस्कारविजेता डा. मुहम्मद् यूनुस् इत्येषः देशस्य अन्तरीम-सर्वकारस्य मुख्योपदेशकरूपेण प्रस्तावितोऽस्ति। प्रमुखः संयोजकः नहिद् इस्लाम् इत्येषः सामाजिक-प्रसारमाध्यमेषु प्रकाशिते वीडियो-इति सन्देशे घोषणाम् अकरोत् यत् समन्वयकानाम् मतानुगुणं डा. यूनुस् इत्ययं पात्रं स्वीकर्तुं अङ्गीकृतवानिति। राष्ट्रपतिः मोहम्मद् शहाबुद्दीन् इत्येषः देशस्य सञ्चालनाय अन्तरीम-सर्वकारस्य निर्माणं कर्तुं निश्चितवान्, यदा बाङ्ग्लादेश्-देशे उग्र-अशान्तेः मध्ये शेख् हसीना प्रधानमन्त्रीपदात् त्यागपत्रं दत्तवती, फलतः आरक्षकाणां छात्र-आन्दोलनकारिणां च मध्ये सङ्घर्षः अभवत्, यस्मिन् नवतितः अधिकाः जनाः मृताः। छात्राः सर्वकारीय-कार्येषु आरक्षणस्य विरोधं कुर्वन्तः आसन्।

## पश्चिम बंगाल-दलजीतसिंह:

सीमा सुरक्षाबलस्य महानिदेशकः दलजीतसिंहचौधरी अद्य पश्चिमबङ्गस्य उत्तर-चौबीस-परगना इति मण्डले भारतबाङ्गलादेशसीमायाः यात्रां कृतवान्। एतेषु महत्त्वपूर्णेषु सीमाक्षेत्रेषु बीएसएफ-इति सङ्घस्य परिचालन-सज्जतया सह, सामरिकनियोजनस्य च समीक्षा अस्य यात्रायाः मुख्योदेश्यः अस्ति। बाङ्गलादेशस्य स्थितिं दृष्ट्वा बीएसएफ-संस्थायाः सुरक्षावर्धनार्थं भारत-बाङ्गलादेश-सीमायाः समीपे संचेतनाऽपि निस्सारितास्ति।

## प्रधानमन्त्री-वाराणसी

अद्य प्रातः वाराणसीनगरस्य काशीविश्वनाथ देवालयस्य समीपस्थे द्वे भवने पतिते येन एकस्याः महिलायाः मृत्युः अभवत् अन्ये च नव जनाः व्रणिताः सन्ति। प्रधानमन्त्री-नरेन्द्रमोदी वाराणसी-आयुक्तेन कौशलराजशर्मा इत्यनेन सह दुर्घटना विषये वार्तालापं कृत्वा प्रभावितजनानाम् सहायतां कर्तुं आदिष्टवान्। प्रातःकाले अतिवृष्ट्याः कारणेन दुर्घटनैषा घटिता। दुर्घटनायाः सूचनाप्राप्तेः अनन्तरं आरक्षिबलेन एनडीआरएफ इति राष्ट्रिय- आपदाप्रतिक्रियाबलस्य चिकित्सकाः श्वानदलानि च तत्स्थानं प्राप्तवन्तः, सर्वेऽपि व्रणिताः चिकित्सालये प्रवेशिताः सन्ति। कौशलराजशर्मा अवदत् यत् काशीविश्वनाथ-देवालयस्य समीपे पुरातन-जर्जरगृहस्वामिनः सुरक्षादृष्ट्या अग्रिम मासद्वयं मासत्रयं वा यावत् अन्यस्थानेषु स्थानान्तरणाय कथिताः सन्ति।

## लोक सभा वित्त विधेयकः

लोकसभया अस्य वर्षस्य वित्त-विधेयकम् विचारार्थं, अनुमोदनाय च स्वीकृतम्। चर्चायाः आरम्भं कुर्वन्, काङ्ग्रेस्-पक्षस्य डा. अमर् सिङ्घ्-वर्यः आरोपितवान् यत् केन्द्रीय-आय-व्ययेन केवलं उच्च-आय-समूहानां जनानां कृते लाभ: प्रदत्त: अस्ति, मध्यम-निम्न-आय-समूहानां विषये न चिन्तितम् अस्ति इति। चर्चायां भागम् गृह्णन् भाजपा-पक्षस्य निशिकान्त-दुबे-वर्यः अवदत् यत्, केन्द्रीय-आयव्यये एन्जल्-कर इत्यस्य उन्मूलनस्य प्रस्तावः कृतः अस्ति, येन देशे नवोद्योग-संस्थानां, यूनां च वृत्ते: सम्भावनाः वर्धिताः भविष्यन्ति। अग्निवीर्-योजनायाः विमर्शार्थं सः विपक्षं पृष्टवान्।

केन्द्रीय-अभिकरणस्य दुरुपयोगस्य आरोपस्य विषये विपक्षम् उद्दिश्य श्री दुबे इत्यनेन प्रहारोऽपि कृतः।

## बुल्गारिया-

बुल्गारियादेशे वर्तमानकाले संवैधानिकव्यवस्थायाः अनुगुणं सर्वकारस्य निर्माणाय तृतीयः अन्तिमः च प्रयासः अपि असफलः अभवत्। ततः परं नूतनं निर्वाचनम् भविष्यति। बुल्गारियादेशे वर्षत्रयेषु एतत् सप्तमं निर्वाचनं भविष्यति। राष्ट्रपतिः रुमेन रादेवः सद्यः एव लघुतमं संसदीयसमूहं प्रधानमन्त्रि-पदस्य अभ्यर्थिं नामाङ्कयितुं सर्वकारस्य निर्माणं कर्तुं च आदिष्टवान्, परन्तु दलं पर्याप्तं समर्थनं सङ्गृहीतुं असफलम् अभवत्। बुल्गारिया-देशस्य संविधाने अधुना राष्ट्रपतिः कार्यवाहि-सर्वकारस्य नियुक्तिं कृत्वा नूतनसंसदीयनिर्वाचनस्य प्रक्रियाम् निर्धारयेत् इति अपेक्षा अस्ति।

## राज्यसभा/जलमार्गः

सर्वकारेण सूचितं यत्, गतदशवर्षेषु, अतिरिक्ततया षडुत्तरैकशतं जलमार्गाः राष्ट्रियजलमार्गाः इति घोषिताः सन्ति। राज्यसभायां अनुपूरकप्रश्नानां प्रत्युत्तरे नौवहन-जलमार्ग-मन्त्री सर्वानन्द सोनोवालः अवदत् यत्, गतदशवर्षेषु जलमार्गेण भारवहनं षड् गुणं वर्धितमस्तीति। द्विसहस्रानन्तरं त्रयोदश-चतुर्दशतमे वर्षे जलमार्गैः अष्टादशलक्ष-मेट्रिक्-टन्-इत्यतोऽधिकानां वस्तूनां प्रेषणम् अभवत्। द्विसहस्रानन्तरं त्रयोविंशति-चतुर्विंशतितमे वर्षे एषा क्षमता त्रयस्त्रिंशदधिकैकशत-लक्षं मेट्रिक् टन् यावत् वर्धितेति सः अवदत्। श्री सोनोवालः अवदत् यत्, जलमार्गाः परिवहन-व्ययं न्यूनीकर्त्तुं, तथा च वस्तूनां-नौवहनस्य कृते एतत् सर्वाधिकतया व्यवहार्यम् अस्तीति।

## पेरिस् ओलिम्पिक्स्ः

पेरिस्-ओलिम्पिक्स्-क्रीडाकुम्भे नीरज् चोपड़ा: पुरुषाणां कुन्तलप्रक्षेपण स्पर्धायाः अन्तिमचक्राय योग्यतां प्राप्नोत्। महिलानां पंचाशत् कि. ग्रा. फ्रीस्टैल इति-क्वार्टर्-प्रागुपान्तचक्रीय-क्रीडायां च यूक्रेन्-देशस्य ओक्साना लिवाच् इत्येनाम् पराजित्य भारतीय-मल्लयोद्ध्री विनेश् फ़ोगाट् उपान्त्य-स्पर्धां प्रति अगच्छत्। हॉकी-क्रीडायां हर्मन्प्रीत् सिङ्घ् इत्यस्य नेतृत्वे विद्यमान-संस्करणे अद्यापि उत्साहपूर्णं प्रदर्शनं कृतम् अस्ति।

।। इति वार्ता: ।।